तोऽसत्त्वात् असत्त्वेऽपि सत्त्वेन व्यवहार्य्यतामात्रमिति शुक्तिरजतादिभ्यो घटादीनां विशेषः इति अध्यासस्वरूपमिथ्याज्ञानमाक्षिप्य तत् समर्थयता च भाष्यकृता तथैव व्यवस्थापितम्" यथा "युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्म्माणामपि सुतरामितरेतरभावानुपपत्तिरित्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्म्माणाञ्चाध्यासस्तद्विपर्य्ययेण विषयिणस्तद्धर्म्माणाञ्च विषयेऽध्यासोमिथ्येति भवितुं युक्तम्। तथाप्यन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्म्मांश्चाध्यस्येतरेतराविवेकेनात्यन्तविविक्तयोर्धर्म्मधर्म्मिणोर्मिथ्याऽज्ञाननिमित्तः सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः॥ आह कोऽयमध्यासोनामेति उच्यते स्मृतिरूपः परत्र पूर्व्वदृष्टावभासः। तं केचिदन्यत्रान्यधर्म्माध्यास इति वदन्ति। केचित्तु यत्र यदध्यासस्तद्विवेकाग्रहणनिबन्धनो भ्रम इति। अन्येतु यत्र यदध्यासस्तस्यैव विपरीतधर्म्मत्वकल्पनामाचक्षते इति सर्वथापि तु अन्यस्यान्यधर्म्मावभासतां न व्यभिचरति। तथा च लोकेऽनुभवः शुक्तिका हि रजतवदवभासते एकश्चन्द्रः स द्वितीयवदिति। कथं पुनः प्रत्यगात्मन्य विषयेऽध्यासो विषयधर्म्माणाम्?। सर्व्वो हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति। युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि। उच्यते। न तावदयमेकान्तेनाविषयः अस्मत्प्रत्ययविषयत्वात् अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः। नचायमस्ति नियमः पुरोऽवस्थित एव विषये विषयान्तरमध्यसितव्यमिति अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति। एवमविरुद्धः प्रत्यगात्मन्यऽन्यऽनात्माध्यासः। तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते। तद्विवेके च वस्तुस्वरूपावधारणं विद्यामाहुः। तत्रैवं सति यत्र यदध्यासस्तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि स न संबध्यते। तमेतमविद्याख्यमात्माऽनात्मनोरितरेतराध्यासं पुरस्कृत्य सर्व्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि। कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि? शास्त्राणि चेति। उच्यते। देहेन्द्रियादिष्वहंममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः। नहीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति। नचाधिष्ठानमन्तरेण इन्द्रियादिव्यापारः संभवति। नचानध्यस्तात्मभावेन देहेन कश्चित् व्याप्रियते। न चैतस्मिन् सर्व्वस्मिन्नसत्यसङ्गस्यात्मनः प्रमातृत्वमुपपद्यते। न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति। तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति"। चतुर्थसूत्रभाष्ये च जगतोव्यावहारिकत्वे अन्यदीयमतं संवादितम् यथा "गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात्। सद्ब्रह्मात्माहमित्येव बोधे कार्य्यं कथं भवेत्?" इत्याक्षिप्य। "अन्वेष्टव्यात्मविज्ञानात् प्राक् प्रमातृत्वमात्मनः। अन्विष्टः स्यात् प्रमातैव पाप्मदोषादिवर्ज्जितः। देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः। लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मऽनिश्चयात्" यथा च लौकिकव्यवहार्य्यपदार्थानां पारमार्थिकसत्त्वाभावेऽपि तत्सत्त्वमङ्गीकृत्य सर्वे व्यवहाराः तेषां च व्यवहारिकसत्त्ववत्त्वम् तथा प्रपञ्चेन समर्थितं खण्डनकृता खण्डनखण्डयाद्ये। यथा "अथ कथायां वादिनोनियममेतादृशं मन्यन्ते प्रमाणादयः सर्व्वतन्त्रसिद्धान्ततया सिद्धाः पदार्थाः सन्तीति कथकाभ्यामभ्युपेयम्। तदपरे न क्षमन्ते। तथाहि प्रमाणादीनां सत्त्वं यदभ्युपेयं कथकेन, तत् कस्य हेतोः? किं तदनभ्युपगच्छद्भ्यां वादिप्रतिवादिभ्यां तदभ्युगमसाहित्यनियतस्य तस्य प्रवर्त्तयितुमशक्यत्वात्, उत कथकाभ्यां प्रवर्त्तनीयवाग्व्यवहारं प्रति हेतुभावात्, उत लोकसिद्धत्वात्, अथ वा तदनभ्युपगमस्य तत्त्वनिर्णयविजयातिप्रसञ्जकत्वात्। न तावदाद्यः तदनभ्युपगच्छतोऽपि चार्व्वाकमाध्यमिकादेर्वाग्विषयविस्तराणां प्रतीयमानत्वात् तस्यैव वा अनिष्पत्तौ भवतस्तन्निरासप्रयासानुपपत्तेः। सोऽयमपूर्व्वः प्रमाणादिसत्त्वानभ्युपगमात्मा वाक्स्तम्भनमन्त्रो भवताभ्यूहितो नूनं, यस्य प्रभावाद्भगवता सुरगुरुणा लोकायतसूत्राणि न प्रणीतानि, तथागतेन वा मध्यमागमा नोपदिष्टाः भगवत्पादेन वा वादरायणीयेषु सूत्रेषु भाष्यं नाभाषि। प्रमाणाद्यनभ्युपगमेऽपि प्रवर्त्तन्तां तन्मते वाचोभङ्ग्यः तास्तु साधनबाधनक्षमा न भवन्ति तावतेति ब्रूम इति चेन्न प्रमाणाद्यनभ्युपगमस्य प्रवर्त्तितत्वं तदीयसाधनबाधनाक्षमतायां न नियामकं किन्तु सद्वचनाभासलक्षणयोगित्वमित्यवश्याभ्युपेयं भवता, येनाभ्युपगम्यापि प्रमाणादीनि प्रवर्त्तिताः मतान्तरानुसारिभिर्व्यवहारा अभ्युपगतप्रमाणादिसत्त्वैर्म्मतान्तरव्यवहारानुसारिभिरपरैस्तथाभूता इति कथ्यन्ते। यदि त्वस्मद्वचसि सद्वचनाभासलक्षणं न भवान् दर्शयितुमीष्टे तदा अनभ्युपगम्य प्रमाणादि भवताप्-